# Mundaka Upanishad

Shanti Paatha

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ दे॒वाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।

स्थि॒रैरङ्गै॑स्तुष्टु॒वाग्ं स॑स्त॒नूभिः॑ व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।

स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।

स्व॒स्ति न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥

ॐ शान्ति॒ः ॐ शान्ति॒ः ॐ शान्तिः॑

ombhadraṁ karṇebhiḥ śrṛṇuyāmadevāh bhadraṁ paśyemākṣabhiryagatrāḥ

sthirairaṅgais tuṣṭavāgṁ sastanubhiḥ vyaśema devahitaṁ yadāyuḥ ||

svasti na indro vṛddhaśravāḥ svasti nah pūṣā viśvavedāḥ ||

svasti nastārkṣyo ariṣṭanemiḥ svasti no bṛhaspatir dadhātu ||

om śāntiḥ omśāntiḥ omśāntiḥ ||

1.1.1

ॐ ब्रह्मा देवानां प्रथमः सम्बभूव।

विश्वस्य कर्ता भुवनस्य गोप्ता

स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्

अथर्वाय ज्येष्ठपुत्राय प्राह॥ १॥

ombrahmādevānāṁprathamaḥsambabhūva ।

viśvsyakartābhuvanasyagoptā

sabrahmavidyāṁsarvavidyāpratiṣṭhām

atharvāyajyeṣṭhaputrāyaprāha ।।1।।

1.1.2

अथर्वणे यां प्रवदेतब्रह्मा

अथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्।

स भारद्वाजाय सत्यवहाय प्राह

भारद्वाजोऽङ्गिरसे परावराम्॥ २॥

atharvaṇeyāṁpravadetabrahma

atharvā tāṁpurovācāṅgire brahmavidyām |

Sa bhāradvājāya satyavahāya prāha

bhāradvājo'ṅgirase parāvarām ||2||

1.1.3

शौनको ह वै महाशालः

अङ्गिरसं विधिवदुपसन्नः पप्रच्छ।

कस्मिन् नु भगवो विज्ञाते

सर्वमिदं विज्ञातं भवतीति॥ ३॥

śaunakoha vaimahāśālah

Aṅgirasaṁ vidhivadupasannaḥ papraccha ।

kasmin nu bhagavovijñāte

sarvamidaṁvijñātaṁbhavatīti ||3||

1.1.4

तस्मै स होवाच-

द्वे विद्ये वेदितव्ये इति ह स्म यद्

ब्रह्मविदो वदन्ति परा चैवापरा च॥४॥

Tasmai sa hovāca-

Dve vidye veditavye iti ha sma yad

Brahmavido vadanti parā caivāparā ca ||4||

1.1.5

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः

शिक्षा  कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ।

अथ परा यया तदक्षरमधिगम्यते॥५॥

Tatrāparā ṛgvedo yajurvedaḥ sāmavedo'tharvavedaḥ

śikṣā kalpo vyākaraṇaṁ niruktaṁ chando jyotiṣamiti iti.

atha parā yayā tadakṣaram adhigamyate ||5||

1.1.6

यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णम्

अचक्षुः श्रोत्रं तदपाणिपादम्।

नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं

यद् भूतयोनिं परिपश्यन्ति धीराः ॥६॥

*yat tad-adreśyam-agrāhyam-agotram-avarṇam*

*acakṣuḥśrotraṁ tad-apāṇipādam* /

*nityaṁ-vibhuṁ-sarvagataṁ-susūkṣmaṁ*

*tadavyayaṁ*

*yadbhūtayoniṁparipaśyantidhīrāḥ* //6//

1.1.7

**यथोर्णनाभिः सृजते गृह्णते च**

**यथा पृथिव्यामोषधयः सम्भवन्ति।**

**यथा सतः पुरुषात्केशलोमानि**

**तथाक्षरात्सम्भवतीह विश्वम्॥७॥**

Yathor ṇanābhiḥ sṛjate gṛhnate ca

Yathā pṛthivyām-oṣadhayaḥ sambhavanti |

Yathā sataḥ puruṣāt keśalomāni

tatha-akṣarāt sambhavatīha viśvam ||7||

1.1.8

**तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।**

**अन्नात्प्राणो मनःसत्यं लोकाःकर्मसु चामृतम्॥८॥**

tapasā cīyate brahma tato'nnam-abhijāyate |

annāt-prāṇo-manaḥsatyaṁ-lokāḥ-karmasu

cāmṛtam ||8||

1.1.9

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।

तस्मादेतद् ब्रह्म नाम रुपमन्नं च जायते॥९॥

yaḥ sarvajñaḥ sarvavid yasya jñānamayaṁ tapaḥ|

tasmādetad brahma nāma rupamannaṁ ca jāyate||9||

॥इति प्रथममुण्डके प्रथमखण्डः॥

1.2.1

तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो

यान्यपश्यन् तानि त्रेतायां बहुधा सन्ततानि।

तान्याचरथ नियतं सत्यकामाः

एष वः पन्थाः सुकृतस्य लोके॥१।२।१॥

tadetat satyaṁ mantreṣu karmāṇi kavayo

yānyapaśyan tāni tretāyāṁ bahudhā santatāni|

tānyācaratha niyataṁ satyakāmāḥ

eṣa vaḥ panthāḥ sukṛtasya loke||1|2|1||

1.2.2

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने।

तदाज्यभागावन्तरेण आहुतीः प्रतिपादयेत्॥ २॥

yadā lelāyate hyarciḥ samiddhe havyavāhane |

tadājyabhāgāvantareṇāhutīḥ pratipādayet ||2||

1.2.3

यस्याग्निहोत्रमदर्शमपौर्णमासम्

अचातुर्मास्यमनाग्रयणमतिथिवर्जितं च।

अहुतमवैश्वदेवमविधिना हुतम्

आसप्तमांस्तस्य लोकान् हिनस्ति॥ ३ ॥

Yasya-agnihotram-adarśam-apaurṇmāsam

Acāturmāsyam-anāgrayaṇam-atithi-varjitaṁ ca |

Ahutam-avaiśva-devam-avidhinā hutam

āsaptamāṁ-tasya lokān hinasti ||3||

1.2.4

काली कराली च मनोजवा च

सुलोहिता या च सुधूम्रवर्णा।

स्फुलिङ्गिनी विश्वरुची च देवी

लेलायमाना इति सप्त जिह्वाः ॥४॥

kālī karālī ca manojavā ca

sulohitā yā ca sudhūmravarṇā |

sphuliṅgianī viśvarucī ca devī

lelāyamānā iti sapta jihvāḥ ||4||

1.2.5

एतेषु यश्चरते भ्राजमानेषु

यथाकालं चाहुतयो ह्याददायन्।

तं नयन्त्येताः सूर्यस्य रश्मयो

यत्र देवानां पतिरेकोऽधिवासः॥५॥

eteṣu yaścarate bhrājamāneṣu

yathākālaṁ cāhutayo hyādadāyan |

taṁ nayantyetāḥ sūryasya raśmayo

yatra devānāṁ patireko'dhivāsaḥ ||5||

1.2.6.

एह्येहीति  तमाहुतयः सुवर्चसः

सूर्यस्य रश्मिभिर्यजमानं वहन्ति।

प्रियां वाचमभिवदन्त्योऽर्चयन्त्यः

एष वः पुण्यः सुकृतो ब्रह्मलोकः॥६॥

ehyehīti tamāhutayaḥ suvarcasaḥ

sūryasya raśmibhiryajamānaṁ vahanti |

priyāṁ vācamabhivadantyo'rcayantyah

eṣa vaḥ puṇyaḥ sukṛto brahmalokaḥ ||6||

1.2.7.

प्लवा ह्येते अदृढा यज्ञरूपा:

अष्टादशोक्तमवरं येषु कर्म।

एतच्छ्रेयो येऽभिनन्दन्ति मूढा:

जरामृत्युं ते पुनरेवापि यन्ति॥७॥

plavā hyete adṛḍhā yajñarūpā

aṣṭādaśoktamavaraṁ yeṣu karma |

etacchreyo ye'bhinandanti mūḍhā

jarāmṛtyuṁ te punarevāpi yanti ||7||

1.2.8.

अविद्यायामन्तरे वर्तमानाः स्वयं

धीराः पण्डितं मन्यमानाः।

जङ्घन्यमानाः परियन्ति मूढा

अन्धेनैव नीयमाना यथान्धाः॥८॥

avidyāyāmantare vartamānāḥ svayaṁ

dhīrāḥ paṇḍitaṁ manyamānāḥ |

pariyanti mūḍhā

andhenaiva nīyamānā yathāndhāḥ ||8||

1.2.9.

अविद्यायां बहुधा वर्तमानाः

वयं कृतार्था  इत्यभिमन्यन्ति बालाः।

यत् कर्मिणो न प्रवेदयन्ति रागात्

तेनातुराः क्षीणलोकाश्च्यवन्ते॥९॥

avidyāyāṁ bahudhā vartamānā

vayaṁ krtārthā ityabhimanyanti bālāḥ |

yat karmiṇo na pravedayanti rāgāt

tenāturāḥ kṣīṇalokāścyavante ||9||

1.2.10.

इष्टापूर्तं मन्यमाना वरिष्ठं

नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।

नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा

इमं लोकं हीनतरं वा विशन्ति॥ १०॥

iṣṭāpūrtaṁ manyamānā variṣṭhaṁ

nānyacchreyo vedayante pramūḍhāḥ |

nākasya pṛṣṭe te sukṛte'nubhūtvā

imaṁ lokaṁ hīnataraṁ vā viśanti ||10||

1.2.11

तपः श्रद्धे ये ह्युपवसन्त्यरण्ये

शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः।

सूर्यद्वारेण ते विरजाः प्रयान्ति

यत्रामृतः स पुरुषो ह्यव्ययात्मा॥ ११॥

tapaḥ śraddhe ye hyupavasantyaraṇye

śāntā vidvāṁso bhaikṣyacaryāṁ carantaḥ |

sūryadvāreṇa te virajāḥ prayānti

yatrāmṛtaḥ sa puruṣo hyavyayātmā ||11||

1.2.12

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणः

निर्वेदमायान्नास्त्यकृतः कृतेन।

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्

समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥ १२।

parīkṣya lokān karmacitān brāhmaṇah

nirvedamāyāt nāstyakṛtaḥ kṛtena ।

tadvijñānārthaṁ sa gurumevābhigacchet

samitpāṇiḥ śrotriyaṁ brahmaniṣṭham ।।12।

1.2.13

तस्मै स विद्वानुपसन्नाय सम्यक्

प्रशान्तचित्ताय शमान्विताय।

येनाक्षरं पुरूषं वेद सत्यं

प्रोवाच तां  तत्त्वतो ब्रह्मविद्याम्॥ १३॥

tasmai sa vidvānupasannāya samyak

praśāntacittāya śamānvitāya |

yenākṣaraṁ purūṣaṁ veda satyaṁ

provāca tāṁ    tattvato brahmavidyām ||13||

इति प्रथममुण्डके द्वितीयखण्डः।

2.1.1

तदेतत् सत्यं यथा सुदीप्तात् पावकाद्

विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।

तथाऽक्षराद् विविधाः सोम्य भावाः

प्रजायन्ते तत्र चैवापि यन्ति॥ १॥

tadetat satyaṁ yathā sudīptāat pāvakād

visphuliṅgāḥ sahasraśaḥ prabhavante sarūpāḥ |

tathā'kṣarād vividhāḥ somya bhāvāḥ

prajāyante tatra caivāpi yanti ||1||

**2.1.2**

**दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः।**

**अप्राणो ह्यमना: शुभ्रो ह्यक्षरात्परतः परः॥२॥**

divyo hyamūrtaḥ puruṣaḥ sabāhyābhyantaro hyajaḥ |

aprāṇo hyamanāḥ śubhro hyakṣarātparataḥ paraḥ ||2||

2.1.3

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ ३ ॥

etasmājjāyate prāṇo manaḥ sarveindriayāṇi ca|

khaṁ vāyurjyotirāpaḥ pṛthivī viśvasya dhāriṇī||3||

2.1.4

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ

दिशः श्रोत्रे वाग् विवृताश्च वेदाः।

वायुः प्राणो हृदयं विश्वमस्य

पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा॥४॥

agnirmūrdhā cakṣuṣī candrasūryau

diśaḥ śrotre vāg vivṛtāśca vedāḥ |

vāyuḥ prāṇo hradayaṁ viśvamasya

padbhyāṁ pṛthivī hyeṣa sarvabhūtāntarātmā ||4||

2.1.5

तस्मादग्निः समिधो यस्य सूर्यः

सोमात् पर्जन्य ओषधयः पृथिव्याम्।

पुमान् रेतः सिञ्चति योषितायां

बह्वी प्रजाः पुरुषात् सम्प्रसूताः॥५॥

tasmādagniḥ samidho yasya sūryaḥ

somāt parjanya oṣadhayaḥ pṛthivyām |

pumān retaḥ siñcati yoṣitāyāṁ

bahviḥ prajāḥ puruṣāt samprasūtāḥ ||5||

2.1.6

तस्मादृचः साम यजूंषि दीक्षा:

यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च।

संवत्सरश्च यजमानश्च लोकाः

सोमो यत्र पवते यत्र सूर्यः ॥ ६ ॥

tasmādṛacaḥ sāma yajūṁṣi dīkṣā

yajñāśca sarve kratavo dakṣiṇāśca |

saṁvatsaraśca yajamānaśca lokāḥ

somo yatra pavate yatra sūryaḥ ||6||

2.1.7

तस्माच्च देवा बहुधा सम्प्रसूताः

साध्या मनुष्याः पशवो वयांसि।

प्राणापानौ व्रीहियवौ तपश्च

श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च॥७॥

tasmācca devā bahudhā samprasūtāḥ

sādhyā manuṣyāḥ paśavo vayāṁsi ।

prāṇāpānau vrīhiyavau tapaśca

śraddhā satyaṁ brahmacaryaṁ vidhiśca ।।7।।

2.1.8

सप्त प्राणाः प्रभवन्ति तस्मात्

सप्तार्चिषः समिधः सप्त होमाः।

सप्त इमे लोका येषु चरन्ति

प्राणा गुहाशया निहिताः सप्त सप्त॥८॥

sapta prāṇāḥ prabhavanti tasmāt

saptārciṣaḥ samidhaḥ sapta homāḥ |

sapta ime lokā yeṣu caranti

prāṇā guhāśayā nihitāḥ sapta sapta ||8||

2.1.9

अतः समुद्रा गिरयश्च सर्वे

अस्मात्     स्यन्दन्ते सिन्धवः सर्वरूपाः।

अतश्च सर्वा ओषधयो रसश्च

येनैष भूतैस्तिष्ठते ह्यन्तरात्मा॥९॥

ataḥ samudrā girayaśca sarve

asmat syandante sindhavaḥ sarvarūpāḥ |

ataśca sarvā oṣadhayo rasaśca

yenaiṣa bhūtaistiṣṭhate hyantarātmā ||9||

2.1.10

पुरुष एवेदं विश्वं कर्म

तपो ब्रह्म परामृतम्।

एतद् यो वेद निहितं गुहायां

सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥ १०॥

puruṣa evedaṁ viśvaṁ karma

tapo brahma parāmṛtam |

etad yo veda nihitaṁ guhāyāṁ

so'vidyāgranthiṁ vikiratīha somya ||10||

इति द्वितीयमुण्डके प्रथमखण्डः॥

2.2.1

आविः सन्निहितं गुहाचरं नाम
महत् पदमत्रैतत् समर्पितम्।
एजत् प्राणन्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं
परं विज्ञानाद् यद्वरिष्ठं प्रजानाम्॥ १ ॥

āviḥ sannihitaṁ guhācaraṁ nāma
mahat padamatraitat samarpitam|
ejat prāṇannimiṣacca yadetajjānatha sadasad varenṇyaṁ
paraṁ vijñānād yadvariṣṭhaṁ prajānām||1||

## 2.2.2

यदार्चिमद् यदणुभ्योऽणु च

यस्मिँल्लोका निहिता लोकिनश्च।

तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ् मनः

तदेतत् सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि॥२।

yadārcimad yadaṇubhyo'ṇu ca

yasmim̐llokā nihitā lokinaśca ।

tadetadakṣaraṁ brahma sa prāṇastadu vāṅ manaḥ

tadetat satyaṁ tadamṛtaṁ tadveddhavyaṁ somya viddhi ।।2।

2.2.3

धनुर्गृहीत्वौपनिषदं महास्त्रं

शरं ह्युपासानिशितं सन्धयीत ।

आयम्य तद् भावगतेन चेतसा

लक्ष्यं तदेवाक्षरं सोम्य विद्धि॥ ३॥

dhanur gṛhītvaupaniṣadaṁ mahāstraṁ

śaraṁ hyupāsāniśitaṁ sandhayīta |

āyamya tad bhāvagatena cetasā

lakṣyaṁ tadevākṣaraṁ somya viddhi ||3||

2.2.4

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत्॥४॥

praṇavo dhanuḥ śaro hyātmā brahma tallakṣyamucyate |
apramattena veddhavyaṁ śaravat tanmayo bhavet ||4||

2.2.5

यस्मिन् द्यौः पृथिवी चान्तरिक्षम्

ओतं मनः सह प्राणैश्च सर्वैः।

तमेवैकं जानथ आत्मानम्

अन्या वाचो विमुञ्चथामृतस्यैष सेतुः॥५॥

yasmin dyauḥ pṛthivī cāntarikṣam

otaṁ manaḥ saha prāṇaiśca sarvaiḥ |

tamevaikaṁ jānatha ātmānam

anyā vāco vimuñcathāmṛtasyaiṣa setuḥ ||5||

2.2.6

अरा इव रथनाभौ संहता यत्र नाड्यः

स एषोऽन्तश्चरते बहुधा जायमानः।

ओमित्येवं ध्यायथ आत्मानं

स्वस्ति वः पाराय तमसः परस्तात्॥ ६ ॥

arā iva rathanābhau saṁhatā yatra nāḍyaḥ

sa eṣo'ntaścarate bahudhā jāyamānaḥ |

omityevaṁ dhyāyatha ātmānaṁ

svasti vaḥ pārāya tamasaḥ parastāt ||6||

2.2.7

यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि।

दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः॥

मनोमयः प्राणशरीरनेता

प्रतिष्ठितोऽन्ने हृदयं सन्निधाय्।

तद् विज्ञानेन परिपश्यन्ति धीरा:

आनन्दरूपममृतं यद् विभाति॥ ७॥

yaḥ sarvajñaḥ sarvavid yasyaiṣa mahimā bhuvi |

divye brahmapure hyeṣa vyomanyātmā

pratiṣṭhitaḥ ||7||

manomayaḥ prāṇaśarīranetā

pratiṣṭhito'nne hradayaṁ sannidhāy ।

tad vijñānena paripaśyanti dhīrāh

ānandarūpamamṛtaṁ yad vibhāti ||8||

2.2.8

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥ ८ ॥

bhidyate hradayagranthiḥ chidyante

sarvasaṁśayāḥ

kṣīyante cāsya karmāṇi tasmin dṛṣṭe parāvare ||8||

2.2.9

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।

तच्छुभ्रं ज्योतिषां ज्योतिः तद् यदात्मविदो विदुः॥ ९ ॥

hiraṇmaye pare kośe virajaṁ brahma niṣkalam |

tacchubhraṁ jyotiṣāṁ jyotih tad yadātmavido viduḥ ||9||

2.2.10

न तत्र  सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति॥ १० ॥

na tatra sūryo bhāti na candratārakaṁ

nemā vidyuto bhānti kuto'yamagniḥ |

tameva bhāntamanubhāti sarvaṁ

tasya bhāsā sarvamidaṁ vibhāti ||10||

2.2.11

ब्रह्मैवेदममृतं पुरस्ताद्

ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।

अधश्चोर्ध्वं च प्रसृतम

ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥ ११ ॥

brahmaivedamamṛtaṁ purastād brahma

paścād brahma dakṣiṇataścottareṇa ।

adhaścordhvaṁ ca prasṛtama

brahmaivedaṁ viśvamidaṁ variṣṭham ।।11।।

इति द्वितीयमुण्डके द्वितीयखण्डः॥

3.1.1

द्वा सुपर्णा सयुजा सखाया

समानं वृक्षं परिषस्वजाते।

तयोरन्यः पिप्पलं स्वाद्वत्ति

अनश्नन्नन्यो अभिचाकशीति॥ १ ॥

dvā suparṇā sayujā sakhāyā

samānaṁ vṛkṣaṁ pariṣasvajāte |

tayoranyaḥ pippalaṁ svādvatti

anaśnannanyo abhicākaśīti ||1||

3.1.2

समाने वृक्षे पुरुषो निमग्नः

अनीशया शोचति मुह्यमानः।

जुष्टं यदा पश्यत्यन्यमीशम्

अस्य महिमानमिति वीतशोकः॥२॥

samāne vṛkṣe puruṣo nimagnaḥ

anīśayā śocati muhyamānaḥ|

juṣṭaṁ yadā paśyatyanyamīśam

asya mahimānamiti vītaśokaḥ||2||

3.1.3

यदा पश्यः पश्यते रुक्मवर्णं

कर्तारमीशं पुरुषं ब्रह्मयोनिम्।

तदा विद्वान् पुण्यपापे विधूय

निरञ्जनः परमं साम्यमुपैति॥ ३ ॥

yadā paśyaḥ paśyate rukmavarṇaṁ

kartāramīśaṁ puruṣaṁ brahmayonim |

tadā vidvān puṇyapāpe vidhūya

nirañjanaḥ paramaṁ sāmyamupaiti ||3||

3.1.4

प्राणो ह्येष यः सर्वभूतैर्विभाति

विजानन् विद्वान् भवते नातिवादि।

आत्मक्रीड आत्मरतिः क्रियावान्

एष ब्रह्मविदां वरिष्ठः॥४॥

Prāno hyeṣa yaḥ sarvabhūtairvibhāti

vijānan vidvān bhavate nātivādi |

ātmakrīḍa ātmaratiḥ kriyāvān

eṣa brahmavidāṁ variṣṭhaḥ ||4||

3.1.5

सत्येन लभ्यस्तपसा ह्येष    आत्मा

सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्।

अन्तःशरीरे ज्योतिर्मयो हि शुभ्रः

यं पश्यन्ति यतयः क्षीणदोषाः॥५॥

satyena labhyastapasā hyeṣa ātmā

samyagjñānena brahmacaryeṇa nityam ।

antaḥśarīre jyotirmayo hi śubhrah

yaṁ paśyanti yatayaḥ kṣīṇadoṣāḥ ।।5।।

3.1.6

सत्यमेव जयते नानृतं

सत्येन पन्था विततो देवयानः।

येनाक्रमन्त्यृषयो ह्याप्तकामा

यत्र तत् सत्यस्य परमं निधानम्॥ ६॥

satyameva jayate nānṛtaṁ

satyena panthā vitato devayānaḥ |

yenākamantyṛṣayo hyāptakāmā

yatra tat satyasya paramaṁ nidhānam ||6||

3.1.7

बृहच्च तद् दिव्यमचिन्त्यरुपं

सूक्ष्माच्च तत् सूक्ष्मतरं विभाति।

दूरात् सुदूरे तदिहान्तिके च

पश्यत्स्विहैव निहितं गुहायाम्॥७॥

bṛhacca tad divyamacintyarupaṁ

sūkṣmācca tat sūkṣmataraṁ vibhāti |

dūrāt sudūre tadihāntike ca

paśyatsvihaiva nihitaṁ guhāyām ||7||

3.1.8

न चक्षुषा गृह्यते नापि वाचा

नान्यैर्देवैस्तपसा कर्मणा वा।

ज्ञानप्रसादेन विशुद्धसत्त्वः

ततस्तु तं पश्यते निष्कलं ध्यायमानः॥८॥

na cakṣuṣā gṛhyate nāpi vācā

nānyairdevaistapasā karmaṇā vā |

jñānaprasādena viśuddhasattvaḥ

tatastu taṁ paśyate niṣkalaṁ dhyāyamānaḥ ||8||

3.1.9

एषोऽणुरात्मा चेतसा वेदितव्य:

यस्मिन् प्राणः पञ्चधा संविवेश।

प्राणैश्चित्तं सर्वमोतं प्रजानां

यस्मिन् विशुद्धे विभवत्येष आत्मा॥९॥

eṣo'ṇurātmā cetasā veditavyo

yasmin prāṇaḥ pañcadhā saṁviveśa |

prāṇaiścittaṁ sarvamotaṁ prajānāṁ

yasmin viśuddhe vibhavatyeṣa ātmā ||9||

3.1.10

यं यं लोकं मनसा संविभाति

विशुद्धसत्त्वः कामयते यांश्च कामान्।

तं तं लोकं जयते तांश्च कामान्

तस्मादात्मज्ञं ह्यर्चयेत भूतिकामः॥ १०॥

yaṁ yaṁ lokaṁ manasā saṁvibhāti

viśuddhasattvaḥ kāmayate yāṁśca kāmān |

taṁ taṁ lokaṁ jayate tāṁśca kāmān

tasmādātmajñaṁ hyarcayeta bhūtikāmaḥ ||10||

इति तृतीयमुण्डके प्रथमखण्ड

3.2.1

स वेदैतत् परमं ब्रह्म धाम

यत्र विश्वं निहितं भाति शुभ्रम्।

उपासते पुरुषं ये ह्यकामाः

ते शुक्रमेतदतिवर्तन्ति धीराः॥ १॥

sa vedaitat paramaṁ brahma dhāma

yatra viśvaṁ nihitaṁ bhāti śubhram |

upāsate puruṣaṁ ye hyakāmāḥ

te śukrametadativartanti dhīrāḥ || 1 ||

3.2.2

कामान् यः कामयते मन्यमानः

स कामभिर्जायते तत्र तत्र।

पर्याप्तकामस्य कृतात्मनस्तु

इहैव सर्वे प्रविलीयन्ति कामाः॥२॥

kāmān yaḥ kāmayate manyamānaḥ

sa kāmabhirjāyate tatra tatra |

paryāptakāmasya kṛtātmanastu

ihaiva sarve pravilīyanti kāmāḥ ||2||

3.2.3

नायमात्मा प्रवचनेन लभ्य:

न मेधया न बहुना श्रुतेन।

यमेवैष वृणुते तेन लभ्यः

तस्यैष आत्मा विवृणुते तनुं स्वाम्॥ ३ ॥

nāyamātmā pravacanena labhyah

na medhayā na bahunā śrutena |

yamevaiṣa vṛṇute tena labhyaḥ

tasyaiṣa ātmā vivṛṇute tanuṁ svām ||3||

3.2.4

नायमात्मा बलहीनेन लभ्य:

न च प्रमादात् तपसो वाप्यलिङ्गात्।

एतैरुपायैर्यतते यस्तु विद्वान्

तस्यैष आत्मा विशते ब्रह्मधाम॥४॥

nāyamātmā balahīnena labhyah

na ca apramādāt tapaso vāpyaliṅgāt ।

etairupāyairyatate yastu vidvān

tasyaiṣa ātmā viśate brahmadhāma ।।4।।

3.2.5

सम्प्राप्यैनमृषयो ज्ञानतृप्ताः
कृतात्मानो वीतरागाः प्रशान्ताः।
ते सर्वगं सर्वतः प्राप्य धीराः
युक्तात्मानः सर्वमेवाविशन्ति॥५॥

samprāpyainamṛṣayo jñānatṛptāḥ
kṛtātmāno vītarāgāḥ praśāntāḥ |
te sarvagaṁ sarvataḥ prāpya dhīrāḥ
yuktātmānaḥ sarvamevāviśanti ||5||

**3.2.6**

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद् यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे॥६॥

vedāntavijñānasuniścitārthāḥ
saṁnyāsayogād yatayaḥ śuddhasattvāḥ |
te brahmalokeṣu parāntakāle
parāmṛtāḥ parimucyanti sarve ||6||

3.2.7

गताः कलाः पञ्चदश प्रतिष्ठा:

देवाश्च सर्वे  प्रतिदेवतासु ।

कर्माणि विज्ञानमयश्च आत्मा

परेऽव्यये सर्व एकीभवन्ति॥७॥

gatāḥ kalāḥ pañcadaśa pratiṣṭhā

devāśca sarve pratidevatāsu |

karmāṇi vijñānamayaśca ātmā

pare'vyaye sarva ekībhavanti ||7||

3.2.8

यथा नद्यः स्यन्दमानाः समुद्रे-

ऽस्तं गच्छन्ति नामरुपे विहाय।

तथा विद्वान् नामरूपात् विमुक्तः

परात्परं पुरुषमुपैति दिव्यम्॥८॥

yathā nadyaḥ syandamānāḥ samudre-

'staṁ gacchanti nāmarupe vihāya|

tathā vidvān nāmarūpāt vimuktaḥ

parātparaṁ puruṣamupaiti divyam ||8||

3.2.9

स यो ह वै तत् परमं ब्रह्म वेद

ब्रह्मैव भवति नास्याब्रह्मवित कुले भवति ।

तरति शोकं तरति पाप्मानं

गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति॥९॥

sa yo ha vai tat paramaṁ brahma veda

brahmaieva bhavati nāsyābrahmavita kule bhavati|

tarati śokaṁ tarati pāpmānaṁ

guhāgranthibhyo vimukto'mṛto bhavati ||9||

3.2.10-

- तदेतद् ऋचाऽभ्युक्तम्-

क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः

स्वयं जुह्वत एकर्षिं श्रद्धयन्तः।

तेषामेवैतां ब्रह्मविद्यां वदेत

शिरोव्रतं विधिवद् यैस्तु चीर्णम्॥ १०॥

tadetad ṛacā'bhyuktam-

kriyāvantaḥ śrotriyā brahmaniṣṭhāḥ

svayaṁ juhvata ekarṣiṁ śraddhayantaḥ |

teṣāmevaitāṁ brahmavidyāṁ vadeta

śirovrataṁ vidhivad yaistu cīrṇam ||10||

3.2.11

तदेतत् सत्यमृषिरङ्गिराः पुरोवाच

नैतदचीर्णव्रतोऽधीते।

नमः परमऋषिभ्यो

नमः परमऋषिभ्यः॥ ११ ॥

tadetat satyamṛṣiraṅgirāḥ purovāca

naitadacīrṇavrato'dhīte |

namaḥ paramarṣibhyo

namaḥ paramarṣibhyaḥ ||11||

इति तृतीयमुण्डके द्वितीय खण्ड